अभिसमयालङ्कार

नमो मञ्जुश्रिये कुमारभूताय

आर्यमैत्रेयनाथविरचितं अभिसमयालङ्कारो नाम प्रज्ञापारमितोपदेशशास्त्रम्

सर्वाकारज्ञाताधिकारः प्रथमः

मङ्गालाचरणम्

या सर्वज्ञतया नयत्युपशमं शान्तैषिणः श्रावकान्
या मार्गज्ञतया जगद्धितकृतां लोकार्थसम्पादिका ।
सर्वाकारमिदं वदन्ति मुनयो विश्वं यया संगतास्
तस्यै श्रावकबोधिसत्त्वगणिनो बुद्धस्य मात्रे नमः ।। १.१ ।।
ग्रान्थारम्भप्रयोजनं सर्वाकारज्ञतामार्गः शासित्रा योऽत्र देशितः ।
धीमन्तो वीक्षिषिरंस्तमनालीढं परैरिति ।। १.२ ।।
स्मृतौ चाधाय सूत्रार्थं धर्मचर्यां दशात्मिकां ।
सुखेन प्रतिपत्सीरन्नित्यारम्भप्रयोजनं ।। १.३ ।।
प्रज्ञापारमितायाः कायिकव्यवस्थापनम्
प्रज्ञापारमिताष्टाभिः पदार्थैः समुदीरिता ।
सर्वाकारज्ञता मार्गज्ञता सर्वज्ञता ततः ।। १.४ ।।
सर्वाकाराभिसम्बोधो मूर्धप्राप्तोऽनुपूर्विकः ।
एकक्षणाभिसम्बोधो धर्मकायश्च तेऽष्टधा ।। १.५ ।।
चित्तोत्पादोऽववादश्च निर्वेधाङ्गं चतुर्विधं ।
आधारः प्रतिपत्तेश्च धर्मधातुस्वभावकः ।। १.६ ।।
आलम्बनं समुद्देशः सन्नाहप्रस्थितिक्रिये ।
सम्भाराश्च सनिर्याणाः सर्वाकारज्ञता मुनेः ।। १.७ ।।
ध्यामीकरणतादीनि शिष्यखड्गपथौ च यौ ।
महानुशंसो दृङ्मार्ग एहिकामुत्रिकैर्गुणैः ।। १.८ ।।
कारित्रमधिमुक्तिश्च स्तुतस्तोभितशंसिताः ।
परिणामेऽनुमोदे च मनस्कारावनुत्तमौ ।। १.९ ।।
निर्हारः शुद्धिरत्यन्तमित्ययं भावनापथः ।
विज्ञानां बोधिसत्त्वानामिति मार्गज्ञतोदिता ।। १.१० ।।
प्रज्ञया न भवे स्थानं कृपया न शमे स्थितिः ।
अनुपायेन दूरत्वं उपायेनाविदूरता ।। १.११ ।।

विपक्षप्रतिपक्षौ च प्रयोगः समतास्य च ।
दृङ्मार्गः श्रावकादीनामिति सर्वज्ञतेष्यते ।। १.१२ ।।
आकाराः सप्रयोगाश्च गुणा दोषाः सलक्षणाः ।
मोक्षनिर्वेधभागीये शैक्षोऽवैवर्तिको गणः ।। १.१३ ।।
समता भवशान्त्योश्च क्षेत्रशुद्धिरनुत्तरा ।
सर्वाकाराभिसम्बोध एष सोपायकौशलः ।। १.१४ ।।
लिङ्गं तस्य विवृद्धिश्च निरूढिश्चित्तसंस्थितिः ।
चतुर्धा च विकल्पस्य प्रतिपक्षश्चतुर्विधः ।। १.१५ ।।
प्रत्येकं दर्शनाख्ये च भावनाख्ये च वर्त्मनि ।
आनन्तर्यसमाधिश्च सह विप्रतिपत्तिभिः ।। १.१६ ।।
मूर्धाभिसमयस्त्रेधा दशधा चानुपूर्विकः ।
एकक्षणाभिसम्बोधो लक्षणेन चतुर्विधः ।। १.१७ ।।
स्वाभाविकः ससाम्भोगो नैर्माणिकोऽपरस्तथा ।
धर्मकायः सकारित्रश्चतुर्धा समुदीरितः ।। १.१८ ।।

सर्वाकारज्ञता

१ चित्तोत्पादः

चित्तोत्पादः परार्थाय सम्यक्सम्बोधिकामता ।
समासव्यासतः सा च यथासूत्रं स चोच्यते ।। १.१९ ।।
भूहेमचन्द्रज्वलनैर्निधिरत्नाकरार्णवैः ।
वज्राचलौषधीमित्रैश्चिन्तामण्यर्कगीतिभिः ।। १.२० ।।
नृपगञ्जमहामार्गयानप्रस्रवणोदकैः ।
आनन्दोक्तिनदीमेवैर्द्वाविंशतिविधः स च ।। १.२१ ।।

२ अववादः

प्रतिपत्तौ च सत्येषु बुद्धरत्नादिषु त्रिषु ।
असक्तावपरिश्रान्तो प्रतिपत्सम्परिग्रहे ।। १.२२ ।।
चक्षुःषु पञ्चसु ज्ञेयः षट्स्वभिज्ञागुणेषु च ।
दृङ्मार्गे भावनाख्ये चेत्यववादो दशात्मकः ।। १.२३ ।।
मृदुतीक्ष्णेन्द्रियौ श्रद्धादृष्टिप्राप्तौ कुलङ्कलौ ।
एकवीच्यन्तरोत्पद्य काराकाराकनिष्ठगाः ।। १.२४ ।।
प्लुतास्त्रयो भवस्याग्रपरमो रूपरागहा ।
दृष्टधर्मशमः कायसाक्षी खड्गश्च विंशतिः ।। १.२५ ।।

३ निर्वेधाङ्गम्

आलम्बनत आकाराद्धेतुत्वात्सम्परिग्रहात् ।
चतुर्विकल्पसंयोगं यथास्वं भजतां सतां ।। १.२६ ।।
श्रावकेभ्यः सखड्गेभ्यो बोधिसत्त्वस्य तायिनः ।
मृदुमध्याधिमात्राणामूष्मादीनां विशिष्टता ।। १.२७ ।।
आलम्बनमनित्यादि सत्याधारं तदाकृतिः ।
निषेधोऽभिनिवेशादेर्हेतुर्यानत्रयाप्तये ।। १.२८ ।।
रूपाद्यायव्ययौ विष्ठास्थिति प्रज्ञप्त्यवाच्यते ।
रूपावादवस्थितिस्तेषां तद्भावेनास्वभावता ।। १.२९ ।।
तयोर्मिथः स्वभावत्वं तदनित्याद्यसंस्थितिः ।
तासां तद्भावशून्यत्वं मिथः स्वाभाव्यमेतयोः ।। १.३० ।।
अनुद्ग्रहो यो धर्माणां तन्निमित्तासमीक्षणं ।
परीक्षणं च प्रज्ञायाः सर्वस्यानुपलम्भतः ।। १.३१ ।।
रूपादेरस्वभावत्वं तदभावस्वभावता ।
तदजातिरनिर्याणं शुद्धिस्तदनिमित्तता ।। १.३२ ।।
तन्निमित्तानधिष्ठानानधिमुक्तिरसंज्ञता ।
समाधिस्तस्य कारित्रं व्याकृतिर्मननाक्षयः ।। १.३३ ।।
मिथस्त्रिकस्य स्वाभाव्यं समाधेरविकल्पना ।
इति निर्वेधभागीयं मृदुमध्याधिमात्रतः ।। १.३४ ।।
द्वैविध्यं ग्राह्यकल्पस्य वस्तुतत्प्रतिपक्षतः ।
मोहराश्यादिभेदेन प्रत्येकं नवधा तु सः ।। १.३५ ।।
द्रव्यप्रज्ञप्त्यधिष्ठानो द्विविधो ग्राहको मतः ।
स्वतन्त्रात्मादिरूपेण स्कन्धाद्याश्रयतस्तथा ।। १.३६ ।।
चित्तानवलीनत्वादिनैःस्वाभाव्यादिदेशकः ।
तद्विपक्षपरित्यागः सर्वथा सम्परिग्रहः ।। १.३७ ।।

४ प्रतिपत्तेराधारः

षोढाधिगमधर्मस्य प्रतिपक्षप्रहाणयोः ।
तयोः पर्युपयोगस्य प्रज्ञायाः कृपया सह ।। १.३८ ।।
शिष्यासाधारणत्वस्य परार्थानुक्रमस्य च ।
ज्ञानस्यायत्नवृत्तेश्च प्रतिष्ठा गोत्रमुच्यते ।। १.३९ ।।
धर्मधातोरसम्भेदाद्गोत्रभेदो न युज्यते ।

आधेयधर्मभेदात्तु तद्भेदः परिगीयते ।। १.४० ।।

५ आलम्बनम्

आलम्बनं सर्वधर्मास्ते पुनः कुशलादयः ।
लौकिकाधिगमाख्याश्च ये च लोकोत्तरा मताः ।। १.४१ ।।
सास्रवानास्रवा धर्माः संस्कृतासंस्कृताश्च ये ।
शिष्यसाधारणा धर्मा ये चासाधारणा मुनेः ।। १.४२ ।।

६ समुद्देशः

सर्वसत्त्वाग्रताचित्तप्रहाणाधिगमत्रये ।
त्रिभिर्महत्त्वैरुद्देशो विज्ञेयोऽयं स्वयम्भुवां ।। १.४३ ।।

७ सन्नाहप्रतिपत्तिः

दानादौ षड्विधे तेषां प्रत्येकं संग्रहेण या ।
सन्नाहप्रतिपत्तिः सा षड्भिः षट्कैर्यथोदिता ।। १.४४ ।।

८ प्रस्थानप्रतिपत्तिः

ध्यानारूप्येषु दानादौ मार्गे मैत्र्यादिकेषु च ।
गतोपलम्भयोगे च त्रिमण्डलविशुद्धिषु ।। १.४५ ।।
उद्देशे षट्स्वभिज्ञासु सर्वाकारज्ञतानये ।
प्रस्थानप्रतिपज्ज्ञेया महायानाधिरोहिणी ।। १.४६ ।।

९ सम्भारप्रतिपत्तिः

दया दानादिकं षट्कं शमथः सविदर्शनः ।
युगनद्धश्च यो मार्ग उपाये यच्च कौशलं ।। १.४७ ।।
ज्ञानं पुण्यं च मार्गश्च धारणी भूमयो दश ।
प्रतिपक्षश्च विज्ञेयः सम्भारप्रतिपत्क्रमः ।। १.४८ ।।

१.
प्रमुदिता भूमिः

लभ्यते प्रथमा भूमिर्दशधा परिकर्मणा
आशयो हितवस्तुत्वं सत्त्वेषु समचित्तता ।। १.४९ ।।

त्यागः सेवा च मित्राणां सद्धर्मालम्बनैषणा ।
सदा नैष्क्रम्यचित्तत्वं बुद्धकायगता स्पृहा ।। १.५० ।।
धर्मस्य देशना सत्यं दशमं वाक्यमिष्यते ।
ज्ञेयं च परिकर्मैषां स्वभावानुपलम्भतः ।। १.५१ ।।

२.
विमला भूमिः

शीलं कृतज्ञता क्षान्तिः प्रामोद्यं महती कृपा ।
गौरवं गुरुशुश्रूषा वीर्यं दानादिकेऽष्टमं ।। १.५२ ।।

३.
प्रभाकरी भूमिः

अतृप्तता श्रुते दानं धर्मस्य च निरामिषं ।
बुद्धक्षेत्रस्य संशुद्धिः संसारापरिखेदिता ।। १.५३ ।।
ह्रीरपत्राप्यमित्येतत्पञ्चधा मननात्मकं ।

४.
अर्चिष्मती भूमिः

वनाशाल्पेच्छता तुष्टिर्धूतसंलेखसेवनं ।। १.५४ ।।
शिक्षाया अपरित्यागः कामानां विजुगुप्सनं ।
निर्वित्सर्वास्तिसन्त्यागोऽनवलीनानपेक्षते ।। १.५५ ।।

५.
सुदुर्जया भूमिः

संस्तवं कुलमात्सर्यं स्थानं सङ्गणिकावहं । आत्मोत्कर्षपरावज्ञे
कर्ममार्गान्दशाशुभान् ।। १.५६ ।।
मानं स्तम्भं विपर्यासं विमतिं क्लेशमर्षणं ।
विवर्जयन्समाप्नोति दशैतान्पञ्चमी भुवं ।। १.५७ ।।

६.
अभिमुखी भूमिः

दानशीलक्षमावीर्यध्यानप्रज्ञाप्रपूरणात् ।

शिष्यखड्गस्पृहात्रासचेतसां परिवर्जकः ।। १.५८ ।।
याचितोऽनवलीनश्च सर्वत्यागेऽप्यदुर्मनाः ।
कृशोऽपि नार्थिनां क्षेप्ता षष्ठीं भूमिं समश्नुते ।। १.५९ ।।

७.
दूरङ्गमा भूमिः

आत्मसत्त्वग्रहो जीवपुद्गलोच्छेदशाश्वतः ।
निमित्तहेत्वोः स्कन्धेषु धातुष्वायतनेषु च ।। १.६० ।।
त्रैधातुके प्रतिष्ठानं सक्तिरालीनचित्तता ।
रत्नत्रितयशीलेषु तद्दृष्टयभिनिवेशिता ।। १.६१ ।।
शून्यतायां विवादश्च तद्विरोधश्च विंशतिः ।
कलङ्का यस्य विच्छिन्नाः सप्तमीमेत्यसौ भुवं ।। १.६२ ।।
त्रिविमोक्षमुखज्ञानं त्रिमण्डलविशुद्धता ।
करुणामनना धर्मसमतैकनयज्ञता ।। १.६३ ।।
अनुत्पादक्षमाज्ञानं धर्माणामेकधेरणा ।
कल्पनायाः समुद्घातः संज्ञादृक्क्लेशवर्जनं ।। १.६४ ।।
शमथस्य च निध्यप्तिः कौशलं च विदर्शने ।
चित्तस्य दान्तता ज्ञानं सर्वत्रप्रतिघाति च ।। १.६५ ।।
सक्तेरभूमिर्यत्रेच्छं क्षेत्रान्तरगतिः समं ।
सर्वत्र स्वात्मभावस्य दर्शनं चेति विंशतिः ।। १.६६ ।।

८.
अचला भूमिः

सर्वसत्त्वमनोज्ञानमभिज्ञाक्रीडनं शुभा ।
बुद्धक्षेत्रस्य निष्पत्तिर्बुद्धसेवापरीक्षणे ।। १.६७ ।।
अक्षज्ञानं जिनक्षेत्रशुद्धिर्मायोपमा स्थितिः ।
संचिन्त्य च भवादानमिदं कर्माष्टधोदितं ।। १.६८ ।।

९.
साधुमतो भूमिः

प्रणिधानान्यनन्तानि देवादीनां रूतज्ञता ।
नदीव प्रतिभानानां गर्भावक्रान्तिरुत्तमा ।। १.६९ ।।
कुलजात्योश्च गोत्रश्च परिवारस्य जन्मनः ।

नैष्क्रम्यबोधिवृक्षाणां गुणपूरे स्वसम्पदः ।। १.७० ।।

१०.
धर्ममेधा भूमिः

नवभूमीरतिक्रम्य बुद्धभूमौ प्रतिष्ठते ।
येन ज्ञानेन सा ज्ञेया दशमी बोधिसत्त्वभूः ।। १.७१ ।।

[प्रतिपक्षसम्भारः] प्रतिपक्षोऽष्टधा ज्ञेयो दर्शनाभ्यासमार्गयोः ।
ग्राह्यग्राहकविकल्पानामष्टानामुपशान्तये ।। १.७२ ।।

२० निर्याणप्रतिपत्तिः

उद्देशे समतायां च सत्त्वार्थे यत्नवर्जने ।
अत्यन्ताय च निर्याणं निर्याणं प्राप्तिलक्षणं ।। १.७३ ।।
सर्वाकारज्ञतायां च निर्याणं मार्गगोचरं ।
निर्याणप्रतिपज्ज्ञेया सेयमष्टविधात्मिका ।। १.७४ ।।
इत्यभिसमयालङ्कारे नाम

प्रज्ञापारमितोपदेशशास्त्रे प्रथमाधिकारः ।

२ ंआर्गज्ञताधिकारः द्वितीयः

१ ध्यामीकरणतादीनि

ध्यामीकरणता भाभिर्देवानां योग्यतां प्रति ।
विषयो नियतो व्याप्तिः स्वभावस्तस्य कर्म च ।। २.१ ।।

२ श्रावकमार्गः

चतुर्णामार्यसत्यानामाकारानुपलम्भतः ।
श्रावकाणामयं मार्गो ज्ञेयो मार्गज्ञतानये ।। २.२ ।।
रूपादिस्कन्धशून्यत्वाच्छून्यतानामभेदतः ।
ऊस्माणौऽनुपलम्भेन तेषां मूर्धगतं मतं ।। २.३ ।।
क्षान्तयस्तेषु नित्यादियोगस्थाननिषेधतः ।
दश भूमीः समारभ्य विस्तरास्थानदेशनात् ।। २.४ ।।

अग्रधर्मगतं प्रोक्तमार्यश्रावकत्मनि ।
तत्कस्य हेतोर्बुद्धेन बुद्ध्वा धर्मासमीक्षणात् ।। २.५ ।।

३ प्रत्येकबुद्धमार्गः

परोपदेशवैयर्थ्यं स्वयम्बोधात्स्वयम्भुवां ।
गम्भीरता च ज्ञानस्य खड्गानामभिधीयते ।। २.६ ।।
शुश्रूषा यस्या यस्यार्थे यत्र यत्र यथा यथा ।
स सोऽर्थः ख्यात्यशब्दोऽपि तस्य तस्य तथा तथा ।। २.७ ।।
ग्राह्यार्थकल्पनाहानाद्ग्राहकस्याप्रहाणतः ।
आधारतश्च विज्ञेयः खड्गमार्गस्य संग्रहः ।। २.८ ।।
प्रज्ञप्तेरविरोधेन धर्मतासूचनाकृतिः ।
ऊष्मगं मूर्धगं रूपाद्यहानादिप्रभावितं ।। २.९ ।।
अध्यात्मशून्यताद्याभी रूपादेरपरिग्राहात् ।
क्षान्ती रूपाद्यनुत्पादाद्याकारैरग्रधर्मता ।। २.१० ।।

४ बोधिसत्त्वमार्गः

क्षान्तिज्ञानक्षणैः सत्यं सत्यं प्रति चतुर्विधैः ।
मार्गज्ञतायां दृड्मार्गः सानुशंसोऽयमुच्यते ।। २.११ ।।
आधाराधेयताभावात्तथताबुद्धयोर्मिथः ।
पर्यायेणाननुज्ञानं महत्ता साप्रमाणता ।। २.१२ ।।
परिमाणान्ततताभावो रूपादेरवधारणं ।
तस्यां स्थितस्य बुद्धत्वेऽनुद्ग्रहात्यागतादयः ।। २.१३ ।।
मैत्र्यादि शून्यता प्राप्तिर्बुद्धत्वस्य परिग्रहः ।
सर्वस्य व्यवदानस्य सर्वाधिव्याधिशातनं ।। २.१४ ।।
निर्वाणग्राहशान्तत्वं बुद्धेभ्यो रक्षणादिकं ।
अप्राणिवधमारभ्य सर्वाकारज्ञतानये ।। २.१५ ।।
स्वयं स्थितस्य सत्त्वानां स्थापनं परिणामनं ।
दानादीनां च सम्बोधाविति मार्गज्ञताक्षणाः ।। २.१६ ।।

५ भावनामार्गकारित्रम्

सर्वतो दमनं नाम सर्वतः क्लेशनिर्जयः ।
उपक्रमाविषह्यत्वं बोधिराधारपूज्यता ।। २.१७ ।।

सास्रवो भावनामार्गः

६ भावनामार्गाधिमुक्तिः

अधिमुक्तिस्त्रिधा ज्ञेया स्वार्था च स्वपरार्थिका ।
परार्थिकैवेत्येषा च प्रत्येकं त्रिविधेष्यते ।। २.१८ ।।
मृद्वी मध्याधिमात्रा च मृदुमृद्वादिभेदतः ।
सा पुनस्त्रिबिधेत्येवं सप्तविंशतिधा मता ।। २.१९ ।।

७ भावनामार्गाधिमुक्तस्य स्तुतिः स्तोभः प्रशंसा च

स्तुतिः स्तोभः प्रशंसा च प्रज्ञापारमितां प्रति ।
अधिमोक्षस्य मात्राणां नवकैस्त्रिभिरिष्यते ।। २.२० ।।

८ परिणामना

विशेषः परिणामस्तु तस्य कारित्रमुत्तमं ।
नोपलम्भाकृतिश्चासावविपर्यासलक्षणः ।। २.२१ ।।
विविक्तो बुद्धपुण्यौघस्वभावस्मृतिगोचरः ।
सोपायश्चानिमित्तश्च बुद्धैरभ्यनुमोदितः ।। २.२२ ।।
त्रैधातुकाप्रपन्नश्च परिणामोऽपरस्त्रिधा ।
मृदुर्मध्योऽधिमात्रश्च महापुण्योदयात्मकः ।। २.२३ ।।

९ अनुमोदना

उपायानुपलम्भाभ्यां शुभमूलानुमोदना ।
अनुमोदे मनस्कारभावनेह विधीयते ।। २.२४ ।।

अनास्रवो भावनामार्गः

१० अभिनिर्हारः

स्वभावः श्रेष्ठता तस्य सर्वस्यानभिसंस्कृतिः ।
नोपलम्भेन धर्माणामर्पणा च महार्थता ।। २.२५ ।।

११ अत्यन्तविशुद्धिः

बुद्धसेवा च दानादिरुपाये यच्च कौशलं ।

हेतवोऽत्राधिमोक्षस्य धर्मव्यसनहेतवः ।। २.२६ ।।
माराधिष्ठानगम्भीरधर्मतानधिमुक्तते ।
स्कन्धाद्यभिनिवेशश्च पापमित्रपरिग्रहः ।। २.२७ ।।
फलशुद्धिश्च रूपादिशुद्धिरेव तयोर्द्वयोः ।
अभिन्नाच्छिन्नता यस्मादिति शुद्धिरुदीरिता ।। २.२८ ।।
क्लेशज्ञेयत्रिमार्गस्य शिष्यखड्गजिनौरसां ।
हानाद्विशुद्धिरात्यन्तिकी तु बुद्धस्य सर्वथा ।। २.२९ ।।
मृदुमृद्वादिको मार्गः शुद्धिर्नवसु भूमिषु ।
अधिमात्राधिमात्रादेर्मलस्य प्रतिपक्षतः ।। २.३० ।।
त्रिधातुप्रतिपक्षत्वं समता मानमेययोः ।
मार्गस्य चेष्यते तस्य चोद्यस्य परिहारतः ।। २.३१ ।।

इत्यभिसमयालङ्कारे नाम
प्रज्ञापारमितोपदेशशास्त्रे द्वितीयाधिकारः ।

३ Sअर्वज्ञताधिकारः तृतीयः

१ प्रज्ञया न भवे स्थानम्

२ कृपया न शमे स्थितिः

नापरे न परे तीरे नान्तराले तयोः स्थिता ।
अध्वनां समताज्ञानात्प्रज्ञापारमिता मता ।। ३.१ ।।

३ अनुपायेन दूरत्वम्

४ उपायेनाविदूरता

अनुपायेन दूरं सा सनिमित्तोपलम्भतः ।
उपायकौशलेनास्याः सम्यगासन्नतोदिता ।। ३.२ ।।

५ विपक्षः

रुपादिस्कन्धशून्यत्वे धर्मेषु त्र्यध्वगेषु च ।
दानादौ बोधिपक्षेषु चर्यासंज्ञा विपक्षता ।। ३.३ ।।

६ प्रतिपक्षः

दानादिष्वनहंकारः परेषां तन्नियोजनं ।
सङ्गकोटिनिषेधोऽयं सूक्ष्मः सङ्गो जिनादिषु ।। ३.४ ।।
तद्गाम्भीर्य प्रकृत्यैव विवेकाद्धर्मपद्धतेः ।
एकप्रकृतिकं ज्ञानं धर्माणां सङ्गवर्जनं ।। ३.५ ।।
दृष्टादिप्रतिषेधेन तस्या दुर्बोधतोदिता ।
रूपादिभिरविज्ञानात्तदचिन्त्यत्वमिष्यते ।। ३.६ ।।
एवं कृत्वा यथोक्तो वै ज्ञेयः सर्वज्ञतानये ।
अयं विभागो निःशेषो विपक्षप्रतिपक्षयोः ।। ३.७ ।।

७ प्रयोगः

रुपादौ तदनित्यादौ तदपूरिप्रपूरयोः ।
तदसङ्गत्वे चर्यायाः प्रयोगः प्रतिषेधतः ।। ३.८ ।।
अविकारो न कर्त्ता च प्रयोगो दुष्करस्त्रिधा ।
यथाभव्य फलप्राप्तेरवन्ध्योऽभिमतश्च सः ।। ३.९ ।।
अपरप्रत्ययो यश्च सप्तधा ख्यातिवेदकः ।

८ समता

चतुर्धामनना तस्य रूपादौ समता मता ।। ३.१० ।।

९ दर्शनमार्गः

धर्मज्ञानान्वयज्ञानक्षान्तिज्ञानक्षणात्मकः ।
दुःखादिसत्ये दृड्मार्ग एष सर्वज्ञतानय ।। ३.११ ।।
रूपं न नित्यं नानित्यमतीतान्तं विशुद्धकं ।
अनुत्पन्नानिरुद्धादि व्योमाभं लेपवर्जितं ।। ३.१२ ।।
परिग्रहेण निर्मुक्तमव्याहारं स्वभावतः ।
प्रव्याहारेण नास्यार्थः परेषु प्राप्यते यतः ।। ३.१३ ।।
नोपलम्भकृदत्यन्तविशुद्धिर्व्याध्यसम्भवः ।
अपायोच्छित्त्यकल्पत्वे फलसाक्षात्क्रियां प्रति ।। ३.१४ ।।
असंसर्गो निमित्तैश्च वस्तुनि व्यञ्जने द्वये ।
ज्ञानस्य या चानुत्पत्तिरिति सर्वज्ञताक्षणाः ।। ३.१५ ।।
इति सेयं पुनः सेयं सेयं खलु पुनस्त्रिधा ।
अधिकारत्रयस्यैषा समाप्तिः परिदीपिता ।। ३.१६ ।।

इत्यभिसमयालङ्कारे नाम प्रज्ञापारमितोपदेशशास्त्रे तृतीयाधिकारः ।

४ Sअर्वाकाराभिसम्बोधाधिकारः चतुर्थः

१ आकाराः

वस्तुज्ञानप्रकाराणामाकारा इति लक्षणं ।
सर्वज्ञतानां त्रैविध्यात्त्रिविधा एव ते मताः ।। ४.१ ।।
असदाकारमारभ्य यावन्निश्चलताकृतिः ।
चत्वारः प्रतिसत्यं ते मार्गे पञ्चदश स्मृताः ।। ४.२ ।।
हेतौ मार्गे च दुःखे च निरोधे च यथाक्रमं ।
अष्टौ ते सप्त पञ्चेति षोडशेति च कीर्तिताः ।। ४.३ ।।
स्मृत्युपस्थानमारभ्य बुद्धत्वाकारपश्चिमाः ।
शिष्याणां बोधिसत्त्वानां बुद्धानां च यथाक्रमं ।। ४.४ ।।
सप्तत्रिंशच्चतुस्त्रिंशत्त्रिंशन्नव च ते मताः ।
त्रिसर्वज्ञत्वभेदेन मार्गसत्यानुरोधतः ।। ४.५ ।।
कृताधिकारा बुद्धेषु तेषूप्तशुभमूलकाः ।
मित्रैः सनाथाः कल्याणैरस्याः श्रवणभाजनं ।। ४.६ ।।
बुद्धोपासनसम्प्रश्नदानशीलादिचर्यया ।
उद्ग्रहधारणादीनां भाजनत्वं सतां मतं ।। ४.७ ।।

२ प्रयोगाः

रूपादिष्वनवस्थानात्तेषु योगनिषेधतः ।
तत्तथतागम्भीरत्वात्तेषां दुरवगाहतः ।। ४.८ ।।
तदप्रामाण्यतः कृच्छ्राच्चिरेण प्रतिबोधतः ।
व्याकृताववितर्त्यत्वे निर्याणे सनिरन्तरे ।। ४.९ ।।
आसन्नबोधे क्षिप्रं च परार्थेऽवृद्धयहानितः ।
धर्माधर्माद्यदृष्टौ च रूपाचिन्त्याद्यदर्शने ।। ४.१० ।।
रूपादेस्तन्निमित्तस्य तद्भावस्याविकल्पकः ।
फलरत्नप्रदाता च शुद्धकः सावधिश्च सः ।। ४.११ ।।

३ गुणाः

माराणां शक्तिहान्यादिश्चतुर्दशविधो गुणः ।

४ दोषाः

दोषाश्च षड्विबोद्धव्याश्चतुर्भिर्दशकैः सह ।। ४.१२ ।।

५ लक्षणानि

लक्ष्यते येन तज्ज्ञेयं लक्षणं त्रिविधं च तत् ।
ज्ञानं विशेषः कारित्रं स्वभावो यश्च लक्ष्यते ।। ४.१३ ।।
तथागतस्य निर्वृत्तौ लोके चालुज्यनात्मके ।
सत्त्वानां चित्तचर्यासु तत्संक्षेपे बहिर्गतौ ।। ४.१४ ।।
अक्षयाकारतायां च सरागादौ प्रविस्तृते ।
महद्गतेऽप्रमाणे च विज्ञाने चानिदर्शने ।। ४.१५ ।।
अदृश्यचित्तज्ञाने च तदुन्मिञ्जादिसंज्ञकं ।
पुनस्तथताकारेण तेषां ज्ञानमतः परं ।। ४.१६ ।।
तथतायां मुनेर्बोधतत्पराख्यानमित्ययं ।
सर्वज्ञताधिकारेण ज्ञानलक्षणसंग्रहः ।। ४.१७ ।।
शून्यत्वे सानिमित्ते च प्रणीधानविवर्जिते ।
अनुत्पादानिरोधादौ धर्मताया अकोपने ।। ४.१८ ।।
असंस्कारेऽविकल्पे च प्रभेदालक्षणत्वयोः ।
मार्गज्ञताधिकारेण ज्ञानलक्षणमिष्यते ।। ४.१९ ।।
स्वधर्ममुपनिश्रित्य विहारे तस्य सत्कृतौ ।
गुरुत्वे माननायां च तत्पूजाकृतकत्वयोः ।। ४.२० ।।
सर्वत्र वृत्तिमज्ज्ञानमदृष्टस्य च दर्शकं ।
लोकस्य शून्यताकारशूचकज्ञापकाक्षगं ।। ४.२१ ।।
अचिन्त्यशान्ततादर्शि लोकसंज्ञनिरोधि च ।
ज्ञानलक्षणमित्युक्तं सर्वाकारज्ञतानये ।। ४.२२ ।।
अचिन्त्यादिविशेषेण विशिष्टैः सत्यगोचरैः ।
विशेषलक्षणं षड्भिर्दशभिश्चोदितं क्षणैः ।। ४.२३ ।।
अचिन्त्यातुल्यते मेयसंख्ययोः समतिक्रमौ ।
सर्वार्यसंग्रहो विज्ञवेद्यासाधारणज्ञते ।। ४.२४ ।।
क्षिप्रज्ञान्यूनपूर्णत्वे प्रतिपत्समुदागमौ ।
आलम्बनं च साधारं साकल्यं सम्परिग्रहः ।। ४.२५ ।।
अनास्वादश्च विज्ञेयो विशेषः षोडशात्मकः ।
विशेषमार्गो मार्गेभ्यो येनान्येभ्यो विशिष्यते ।। ४.२६ ।।
हितं सुखं च त्राणं च शरणं लयनं नृणां ।

परायणं च द्वीपं च परिणायकसंज्ञकं ।। ४.२७ ।।
अनाभोगं त्रिभिर्यानैः फलासाक्षात्क्रियात्मकं ।
पश्चिमं गतिकारित्रमिदं कारित्रलक्षणं ।। ४.२८ ।।
क्लेशलिङ्गनिमित्तानां विपक्षप्रतिपक्षयोः ।
विवेको दुष्करैकान्तावुद्देशोऽनुपलम्भकः ।। ४.२९ ।।
निषिद्धाभिनिवेशश्च यश्चालम्बनसंज्ञकः ।
विप्रत्ययोऽविघाती च सोऽपदागत्यजातिकः ।। ४.३० ।।
तथतानुपलम्भश्च स्वभावः षोडशात्मकः ।
लक्षीव लक्ष्यते चेति चतुर्थं लक्षणं मतं ।। ४.३१ ।।

६ मोक्षभागीयम्

अनिमित्तप्रदानादिसमुदागमकौशलं ।
सर्वाकारावबोधेऽस्मिन्मोक्षभागीयमिष्यते ।। ४.३२ ।।
बुद्धाद्यालम्बना श्रद्धा वीर्यं दानादिगोचरं ।
स्मृतिराशयसम्पत्तिः समाधिरविकल्पना ।। ४.३३ ।।
धर्मेषु सर्वैराकारैर्ज्ञानं प्रज्ञेति पञ्चधा ।
तीक्ष्णैः सुबोधा सम्बोधिर्दुर्बोधा मृदुभिर्मता ।। ४.३४ ।।

७ विर्वेधभागीयम्

आलम्बनं सर्वसत्त्वा ऊष्मणामिह शस्यते ।
समचित्तादिराकारस्तेष्वेव दशधोदितः ।। ४.३५ ।।
स्वयं पापान्निवृत्तस्य दानाद्येषु स्थितस्य च ।
तयोर्नियोजनान्येषां वर्णवादानुकूलते ।। ४.३६ ।।
मूर्धगं स्वपराधारं सत्यज्ञानं तथा क्षमा ।
तथाग्रधर्मा विज्ञेयाः सत्त्वानां पाचनादिभिः ।। ४.३७ ।।

८ अवैवर्तिको गणः

निर्वेधाङ्गान्युपादाय दर्शनाभ्यासमार्गयोः ।
ये बोधिसत्त्वा वर्तन्ते सोऽत्रावैवर्तिको गणः ।। ४.३८ ।।
रूपादिभ्यो निवृत्त्याद्यैर्लिङ्गैर्विंशतिधेरितैः ।
निर्वेधाङ्गशितस्येदमक्वैर्तिकलक्षणं ।। ४.३९ ।।
रूपादिभ्यो निवृत्तिश्च विचिकित्साक्षणक्षयो ।
आत्मनः कुशलस्थस्य परेषां तन्नियोजनं ।। ४.४० ।।

पराधारं च दानादि गम्भीरेऽर्थेऽप्यकांक्षणं ।
मैत्रं कायाद्यसंवासः पंचधावरणेन च ।। ४.४१ ।।
सर्वानुशयहानं च स्मृतिसम्प्रज्ञता शुचि ।
चीवरादि शरीरे च कृमीणामसमुद्भवः ।। ४.४२ ।।
चित्ताकौटिल्यमादानं धूतस्यामत्सरादिता ।
धर्मतायुक्तगामित्वं लोकार्थं नरकैषणा ।। ४.४३ ।।
परैरनेयता मारस्यान्यमार्गोपदेशिनः ।
मार इत्येव बोधश्च चर्या बुद्धानुमोदिता ।। ४.४४ ।।
ऊष्ममूर्धसु सक्षान्तिष्वग्रधर्मेष्ववस्थितः ।
लिङ्गैरमीभिर्विंशत्या सम्बोधेर्न निवर्तते ।। ४.४५ ।।
क्षान्तिज्ञानक्षणाः षट्च पञ्च पञ्च च दृक्पथे ।
बोधिसत्त्वस्य विज्ञेयमवैवर्तिकलक्षणं ।। ४.४६ ।।
रूपादिसंज्ञाव्यावृत्तिर्दार्ढ्यं चित्तस्य हीनयोः ।
यानयोर्विनिवृत्तिश्च ध्यानाद्यङ्गपरिक्षयः ।। ४.४७ ।।
कायचेतोलघुत्वं च कामसेवाभ्युपायिकी ।
सदैव ब्रह्मचारित्वमाजीवस्य विशुद्धता ।। ४.४८ ।।
स्कन्धादावन्तरायेषु सम्भारे सेन्द्रियादिके ।
समरे मत्सरादौ च नेति योगानुयोगयोः ।। ४.४९ ।।
विहारप्रतिषेधश्च धर्मस्याणोरलब्धता ।
निश्चितत्त्वं स्वभूमौ च भूमित्रितयसंस्थितिः ।। ४.५० ।।
धर्मार्थः जीवितत्याग इत्यमी षोडश क्षणाः ।
अवैवर्तिकलिङ्गानि दृङ्मार्गस्थस्य धीमतः ।। ४.५१ ।।
गम्भीरो भावनामार्गो गाम्भीर्यं शून्यतादिकं ।
समारोपापवादान्तमुक्तता सा गभीरता ।। ४.५२ ।।
चिन्तातुलननिध्यानान्यभीक्ष्णं भावनापथः ।
निर्वेधाङ्गेषु दृङ्मार्गे भावनामार्ग एव च ।। ४.५३ ।।
प्राबन्धिकत्वादिष्टोऽसौ नवधा च प्रकारतः ।
मृदुमध्याधिमात्राणां पुनर्मृद्धादिभेदतः ।। ४.५४ ।।
असंख्येयादिनिर्देशाः परमार्थेन न क्षमाः ।
कृपानिष्यन्दभूतास्ते संवृत्याभिमता मुनेः ।। ४.५५ ।।
हानिवृद्धी न युज्येते निरालापस्य वस्तुनः ।
भावनाख्येन किं हीनं वर्त्मना किमुपदागतं ।। ४.५६ ।।
यथा बोधिस्तथैवासाविष्टस्यार्थस्य साधकः ।
तथतालक्षणा बोधिः सोऽपि तल्लक्षणो मतः ।। ४.५७ ।।

पूर्वेण बोधिर्नो युक्ता मनसा पश्चिमेन वा ।
दीपदृष्टान्तयोगेन गम्भीरा धर्मताष्टधा ।। ४.५८ ।।
उत्पादे च निरोधे च तथतायां गभीरता ।
ज्ञेये ज्ञाने च चर्यायामद्वयोपायकौशले ।। ४.५९ ।।

९ भवशान्त्योः समता

स्वप्नोपमत्वाद्धर्माणां भवशान्त्योरकल्पना ।
कर्माभावादिचोद्यानां परिहारा यथोदिताः ।। ४.६० ।।

१० अनुत्तरा क्षेत्रशुद्धिः

सत्त्वलोकस्य याशुद्धिस्तस्याः शुद्ध्युपहारतः ।
तथा भाजनलोकस्य बुद्धक्षेत्रस्य शुद्धता ।। ४.६१ ।।

११ उपायकौशलम्

विषयोऽस्य प्रयोगस्य शात्रवाणामतिक्रमः ।
अप्रतिष्ठो यथावेधमसाधारणलक्षणः ।। ४.६२ ।।
असक्तोऽनुपलम्भश्च निमित्तप्रनिधिक्षतः ।
तल्लिङ्गं चाप्रमाणं च दशधोपायकौशलं ।। ४.६३ ।।

इत्यभिसमयालङ्कारे नाम प्रज्ञापारमितोपदेशशास्त्रे चतुर्थाधिकारः ।।

ंऊर्धाभिसमयाधिकारः पञ्चमः

१ लिङ्गम(ऊष्मा मुर्धप्रयोगः)

स्वप्नान्तरेऽपि स्वप्नाभसर्वधर्मेक्षणादिकं ।
मूर्धप्राप्तस्य योगस्य लिङ्गं द्वादशधा मतं ।। ५.१ ।।

२ विवृद्धिः(मूर्धा मूर्धप्रयोगः)

जम्बुद्विपजनेयत्ताबुद्धपूजाशुभादिकां ।
उपमां बहुधा कृत्वा विवृद्धिः षोडशात्मिका ।। ५.२ ।।

३ निरुधिः(क्षान्तिः मूर्धप्रयोगः)

त्रिसर्वज्ञत्वधर्माणां परिपुरिरनुत्तरा ।
अपरित्यक्तसत्त्वार्था निरूढिरभिधीयते ।। ५.३ ।।

४ चित्तसंस्थितिः(अग्रधर्माख्यः मूर्धप्रयोगः)

चतुर्द्वीपकसाहस्रद्विसाहस्रकोपमः ।
कृत्वा पुण्यबहुत्वेन समाधिः परिकीर्तितः ।। ५.४ ।।

५ दर्शनमार्गः(मूर्धप्रयोगः)

प्रवृत्तौ च निवृत्तौ च प्रत्येकं तौ नवात्मकौ ।
ग्राह्यौ विकल्पौ विज्ञेयावयथाविषयात्मकौ ।। ५.५ ।।
द्रव्यप्रज्ञप्तिसत्सत्त्वविकल्पौ ग्राहकौ मतौ ।
पृथग्जनार्यभेदेन प्रत्येकं तौ नवात्मकौ ।। ५.६ ।।
ग्राह्यौ चेन्न तथा स्तोऽर्थौ कस्य तौ ग्राहकौ मतौ ।
इति ग्राहकभावेन शून्यतालक्षणं तयोः ।। ५.७ ।।
एष स्वभावे गोत्रे च प्रतिपत्समुदागमे ।
ज्ञानस्यालम्बनाभ्रान्तौ प्रतिपक्षविपक्षयोः ।। ५.८ ।।
स्वस्मिन्नधिगमे कर्तृतत्कारित्रक्रियाफले ।
प्रवृत्तिपक्षाधिष्ठानो विकल्पो नवधा मतः ।। ५.९ ।।
भवशान्तिप्रपातित्वान्न्यूनत्वेऽधिगमस्य च ।
परिग्रहस्याभावे च वैकल्ये प्रतिपद्गते ।। ५.१० ।।
परप्रत्यगामित्वे समुद्देशनिवर्तने ।
प्रादेशिकत्वे नानात्वे स्थानप्रस्थानमोहयोः ।। ५.११ ।।
पृष्ठतो गमने चेति विकल्पोऽयं नवात्मकः ।
निवृत्तिपक्षाधिष्ठानः श्रावकादिमनोभवः ।। ५.१२ ।।
ग्राहकः प्रथमो ज्ञेयो ग्रहणप्रतिमोक्षणे ।
मनस्क्रियायां धातूनामुपश्लेषे त्रयस्य च ।। ५.१३ ।।
स्थाने चाभिनिवेशे च प्रज्ञप्तौ धर्मवस्तुनः ।
सक्तौ च प्रतिपक्षे च यथेच्छं च गतिक्षतौ ।। ५.१४ ।।
यथोद्देशमनिर्याणे मार्गामार्गावधारणे ।
सनिरोधे समुत्पादे वस्तुयोगवियोगयोः ।। ५.१५ ।।
स्थाने गोत्रस्य नाशे च प्रार्थनाहेत्वभावयोः ।
प्रत्यर्थिकोपलम्भे च विकल्पो ग्राहकोऽपरः ।। ५.१६ ।।
बोधौ सन्दर्शनान्येषां तद्धेतोश्च परीन्दना ।

तत्प्राप्त्यनन्तरो हेतुः पुण्यबाहुल्यलक्षणः ।। ५.१७ ।।
क्षयानुत्पादयोर्ज्ञाने मलानां बोधिरुच्यते ।
क्षयाभावादनुत्पादात्ते हि ज्ञेये यथाक्रमं ।। ५.१८ ।।
प्रकृतावनिरुद्धायां दर्शनाख्येन वर्त्मना ।
विकल्पजातं कि क्षीणं किं वानत्पत्तिमागतं ।। ५.१९ ।।
सत्ता च नाम धर्माणां ज्ञेये चावरणक्षयः ।
कथ्यते यत्परैः शास्तुरत्र विस्मीयते मया ।। ५.२० ।।
नापनेयमतः किञ्चित्प्रक्षेप्तव्यं न किंचन ।
द्रष्टव्यं भूततो भूतं भूतदर्शी विमुच्यते ।। ५.२१ ।।
एकैकस्यैव दानादौ तेषां यः संग्रहो मिथः ।
स एकक्षणिकः क्षान्तिसंगृहीतोऽत्र दृक्पथः ।। ५.२२ ।।
स समाधिं समापद्य ततः सिंहविजृम्भितं ।
अनुलोमं विलोमं च प्रतीत्योत्पादमीक्षते ।। ५.२३ ।।

६ भावनामार्गः(मूर्धप्रयोगः)

कामाप्तमबधीकृत्य विज्ञानमसमाहितं ।
सनिरोधाः समपत्तीर्गत्वागम्य नव द्विधा ।। ५.२४ ।।
एकद्वित्रिचतुःपञ्चषट्सप्ताष्टव्यतिक्रमात् ।
अवस्कन्दसमापत्तिरनिरोधमतुल्यता ।। ५.२५ ।।
संक्षेपे विस्तरे बुद्धैः सानाथ्येनापरिग्रहे ।
त्रैकालिके गुणाभावे श्रेयसस्त्रिविधे पथि ।। ५.२६ ।।
एको ग्राह्यविकल्पोऽयं प्रयोगाकारगोचरः ।
द्वितीयश्चित्तचैत्तानां प्रवृत्तिविषयो मतः ।। ५.२७ ।।
अनुत्पादस्तु चित्तस्य बोधिमण्डामनस्क्रिया ।
हीनयानमनस्कारौ सम्बोधेरमनस्कृतिः ।। ५.२८ ।।
भावनेऽभावने चैव तद्विपर्यय एव च ।
अयथार्थश्च विज्ञेयो विकल्पो भावनापथे ।। ५.२९ ।।
ग्राहकः प्रथमो ज्ञेयः सत्त्वप्रज्ञप्तिगोचरः ।
धर्मप्रत्यशून्यत्वसक्तिप्रविचयात्मकः ।। ५.३० ।।
कृते च वस्तुनो यानत्रितये च स कीर्तितः ।
दक्षिणाया अशुद्धौ वा चर्यायाश्च विकोपने ।। ५.३१ ।।
सत्त्वप्रज्ञप्तितद्धेतुविषयो नवधापरः ।
भावनामार्गसम्बद्धो विपक्षस्तद्विघाततः ।। ५.३२ ।।
सर्वज्ञतानां तिसृणां यथास्वं त्रिविधावृत्तौ ।

शान्तिमार्गतथतादिसम्प्रयोगवियोगयोः ।। ५.३३ ।।
असमत्वे च दुःखादौ क्लेशानां प्रकृतावपि ।
द्वयाभावे च संमोहे विकल्पः पश्चिमो मतः ।। ५.३४ ।।
आसां क्षये सतीतीनां चिरायोच्छ्वसिता इव ।
सर्वाकारजगत्सौख्यसाधना गुणसम्पदः ।। ५.३५ ।।
सर्वाः सर्वाभिसारेण निकामफलशालिनं ।
भजन्ते तं महासत्त्वं महोदधिमिवापगाः ।। ५.३६ ।।

७ आनन्तर्यसमाधिः(मूर्धप्रयोगः)

त्रिसाहस्रजनं शिष्यखड्गाधिगमसम्पदि ।
बोधिसत्त्वस्य च न्यामे प्रतिष्ठाप्य शुभोपमाः ।। ५.३७ ।।
कृत्वा पुण्यबहुत्वेन बुद्धत्वाप्तेरनन्तरः ।
आनन्तर्यसमाधिः स सर्वाकारज्ञता च तत् ।। ५.३८ ।।
आलम्बनमभावोऽस्य स्मृतिश्चाधिपतिर्मतः ।
आकारः शान्तता चात्र जल्पाजल्पिप्रवादिनां ।। ५.३९ ।।
आलम्बनोपपत्तौ च तत्स्वभावावधारणे ।
सर्वाकरज्ञताज्ञाने परमार्थे ससंवृत्तौ ।। ५.४० ।।
प्रयोगे त्रिषु रत्नेषु सोपाये समये मुनेः ।
विपर्यासे समार्गे च प्रतिपक्षविपक्षयोः ।। ५.४१ ।।
लक्षणे भावनायां च मता विप्रतिपत्तयः ।
सर्वाकारज्ञताधारा षोढा दश च वादिनां ।। ५.४२ ।।

इत्यभिसमयालङ्कारे नाम प्रज्ञापारमितोपदेशशास्त्रे पंचमाधिकारः ।

âनुपूर्विकाधिकारः षष्ठः

दानेन प्रज्ञया यावद्बुद्धादौ स्मृतिभिश्च सा ।
धर्माभावस्वभावेनेत्यनुपूर्वक्रिया मता ।। ६.१ ।।

इत्यभिसमायालङ्कारे नाम प्रज्ञापारमितोपदेशशास्त्रे षष्ठाधिकारः ।

Eकक्षणाभिसम्बोधाधिकारः सप्तमः

१ अविपाकललक्षणः

अनास्रवाणां सर्वेषामेकैकेनापि संग्रहात् ।
एकक्षणावबोधोऽयं ज्ञेयो दानादिना मुनेः ।। ७.१ ।।
अरघट्टं यथैकापि पदिका पुरुषेरिता ।
सकृत्सर्वं चालयति ज्ञानमेकक्षणे तथा ।। ७.२ ।।

२ विपाकलक्षणः

विपाकधर्मतावस्था सर्वशुक्लमयी यदा ।
प्रज्ञापारमिता जाता ज्ञानमेकक्षणे तदा ।। ७.३ ।।

३ अलक्षणलक्षणः

स्वप्नोपमेषु धर्मेषु स्थित्वा दानादिचर्यया ।
अलक्षणत्वं धर्माणां क्षणेनैकेन विन्दति ।। ७.४ ।।

४ अद्वयलक्षणः

स्वप्नं तद्दर्शिनं चैव द्वययोगेन नेक्षते ।
धर्माणामद्वयं तत्त्वं क्षणेनैकेन पश्यति ।। ७.५ ।।

इत्यभिसमयालङ्कारे नाम
प्रज्ञापारमितोपदेशशास्त्रे सप्तमाधिकारः ।

धर्मकायाधिकारः अष्टमः

१ स्वभावकायः

सर्वाकारां विशुद्धिं ये धर्माः प्राप्ता निरास्रवाः ।
स्वाभाविको मुनेः कायस्तेषां प्रकृतिलक्षणः ।। ८.१ ।।

२ ज्ञानधर्मकायः

बोधिपक्षाप्रमाणानि विमोक्षा अनुपूर्वशः ।
नवात्मिका समापत्तिः कृत्स्नं दशविधात्मकं ।। ८.२ ।।
अभिभ्वायतनान्यष्टप्रकाराणि प्रभेदतः ।
अरणा प्रणिधिज्ञानमभिज्ञाः प्रतिसंविदः ।। ८.३ ।।
सर्वाकाराश्चतस्त्रोऽथ शुद्धयो वशिता दश ।

बलानि दश चत्वारि वैशारद्यान्यरक्षणं ।। ८.४ ।।
त्रिविधं स्मुत्युपस्थानं त्रिधासंमोषधर्मता ।
वासनायाः समुद्घातो महती करुणा जने ।। ८.५ ।।
आवेणिका मुनेरेव धर्मा येऽष्टादशेरिताः ।
सर्वाकारज्ञता चेति धर्मकायोऽभिधीयते ।। ८.६ ।।
श्रावकस्यारणादृष्टेर्नृक्लेशपरिहारिता ।
तत्क्लेशस्त्रोतौच्छित्यै ग्रामादिषु जिनारणा ।। ८.७ ।।
अनाभोगमनासङ्गमव्याघातं सदा स्थितं ।
सर्वप्रश्नापनुद्बौद्धं प्रणिधिज्ञानमिष्यते ।। ८.८ ।।
परिपाकं गते हेतौ यस्य यस्य यदा यदा ।
हितं भवति कर्त्तव्यं प्रथते तस्य तस्य सः ।। ८.९ ।।
वर्षत्यपि हि पर्जन्ये नैव बीजं प्ररोहति ।
समुत्पादेऽपि बुद्धानां नाभव्यो भद्रमश्नुते ।। ८.१० ।।
इति कारित्रवैपुल्याद्बुद्धो व्यापी निरुच्यते ।
अक्षयत्वाच्च तस्यैव नित्य इत्यपि कथ्यते ।। ८.११ ।।

३ सम्भोगकायः

द्वात्रिंशल्लक्षणाशीतिव्यञ्जनात्मा मुनेरयं ।
साम्भोगिको मतः कायो महायानोपभोगतः ।। ८.१२ ।।
चक्राङ्कहस्तः क्रमकूर्मपादो जालावनद्धाङ्गुलिपाणिपादः ।
करौ सपादौ तरुणौ मृदू च समुत्सदै सप्तभिराश्रयोऽस्य ।। ८.१३ ।।
दीर्घाङ्गुलिर्व्यायतपार्ष्णिगात्रं प्राज्यं त्वृजूच्छङ्खपदोर्ध्वरोमा ।
एणेयजङ्घश्च पटूरुबाहुः कोशावनद्धोत्तमबस्तिगुह्यः ।। ८.१४ ।।
सुवर्णवर्णः प्रतनूच्छविश्च प्रदक्षिणैकैकसुजातरोमा ।
ऊर्णाङ्कितास्यो हरिपूर्वकायः स्कन्धौ वृतावस्य चितान्तरांसः ।। ८.१५ ।।
हीनो रसः ख्याति रसोत्तमोऽस्य न्यग्रोधवन्मण्डलतुल्यमूर्तिः ।
उष्णीषमूर्धा पृथुचारुजिव्हो ब्रह्मस्वरः सिंहहनुः सुशुक्लाः ।। ८.१६ ।।
तुल्याः प्रमाणेऽविरलाश्च दन्ता अन्यूनसंख्या दशिकाश्चतस्रः ।
नीलेक्षणो गोवृषपक्ष्मनेत्रो द्वात्रिंशदेतानि हि लक्षणानि ।। ८.१७ ।।
यस्य यस्यात्र यो हेतुर्लक्षणस्य प्रसाधकः ।
तस्य तस्य प्रपूर्यायं समुदागमलक्षणः ।। ८.१८ ।।
गुरूणामनुयानादिर्दृढता संवरं प्रति ।
संग्रहासेवनं दानं प्रणीतस्य च वस्तुनः ।। ८.१९ ।।
वध्यमोक्षसमादानं विवृद्धिः कुशलस्य च ।

इत्यादिको यथासूत्रं हेतुर्लक्षणसाधकः ।। ८.२० ।।
ताम्राः स्निग्धाश्च तुङ्गाश्च नखा अङ्गुलयो मुनेः ।
वृत्ताश्चितानुपूर्वाश्च गूढा निर्ग्रन्थयः शिराः ।। ८.२१ ।।
गूढौ गुल्फौ समौ पादौ सिंहेभद्विजगोपतेः ।
विक्रान्तं दक्षिणं चारुगमनमृजुवृत्तता ।। ८.२२ ।।
मुष्टानुपूर्वते मेध्यमृदुत्वे शुद्धगात्रता ।
पूर्वव्यञ्जनता चारुपृथुमण्डलगात्रता ।। ८.२३ ।।
समक्रमत्वं शुद्धत्वं नेत्रयोः सुकुमारता ।
अदीनोत्सदगात्रत्वे सुसंहतनगात्रता ।। ८.२४ ।।
सुविभक्ताङ्गता ध्वान्तप्रध्वस्तालोकशुद्धता ।
वृत्तमृष्टाक्षताक्षामकुक्षिताश्च गभीरता ।। ८.२५ ।।
दक्षिणावर्तता नाभेः समन्ताद्दर्शनीयता ।
समाचारः शुचिः कालतिलकापगता तनुः ।। ८.२६ ।।
करौ तुलमृदू स्निग्धगम्भीरायतलेखता ।
नात्यायतं वचो बिम्बप्रतिबिम्बौपमौष्ठता ।। ८.२७ ।।
मृद्वी तन्वी च रक्ता च जिव्हा जीमूतघोषता ।
चारूमञ्जुस्वरो दंष्ट्रा वृत्तास्तीक्ष्णाः सिताः समाः ।। ८.२८ ।।
अनुपूर्वी गतास्तुङ्गा नासिका परमं शुचिः ।
विशाले नयने पक्ष्मचितं पद्मदलाक्षिता ।। ८.२९ ।।
आयतश्लक्ष्णसुस्निग्धसमरोम्नौ भ्रुवौ भुजौ ।
पीनायतौ समौ कर्णावुपघातविवर्जितौ ।। ८.३० ।।
ललाटमपरिम्लानं पृथुपूर्णोत्तमाङ्गता ।
भ्रभराभाश्चिताः श्लक्ष्णा असंलुलितमुर्तयः ।। ८.३१ ।।
केशा अपरुषाः पुसां सौरभ्यादपहारिणः ।
श्रीवत्सः स्वस्तिकं चेति बुद्धानुव्यञ्जनं मतं ।। ८.३२ ।।

४ नैर्माणिककायः

करोति येन चित्राणि हितानि जगतः समं ।
आभवात्सोऽनुपच्छिन्नः कायो नैर्माणिको मुनेः ।। ८.३३ ।।
बुद्धकारित्राणि तथा कर्माप्यनुच्छिन्नमस्यासंसारमिष्यते ।
गतीनां शमनं कर्म संग्रहे च चतुर्विधे ।। ८.३४ ।।
निवेशनं ससंक्लेशे व्यवदानावबोधने ।
सत्त्वानामर्थयाथात्म्ये षट्सु पारमितासु च ।। ८.३५ ।।
बुद्धमार्गे प्रकृत्यैव शून्यतायां द्वयक्षये ।

संकेतेऽनुपलम्भे च परिपाके च देहिनां ।। ८.३६ ।।
बोधिसत्त्वस्य मार्गेऽभिनिवेशस्य निवारणे ।
बोधिप्राप्तौ जिनक्षेत्रविशुद्धौ नियतिं प्रति ।। ८.३७ ।।
अप्रमेये च सत्त्वार्थे बुद्धसेवादिके गुणे ।
बोधेरङ्गेष्वनाशे च कर्मणां सत्यदर्शने ।। ८.३८ ।।
विपर्यासप्रहाणे च तदवस्तुकतानये ।
व्यवदाने ससम्भारे संस्कृतासंस्कृते प्रति ।। ८.३९ ।।
व्यतिभेदापरिज्ञाने निर्वाणे च निवेशनं ।
धर्मकायस्य कर्मेदं सप्तविंशतिधा मतं ।। ८.४० ।।

इत्यभिसमयालङ्कारे नाम प्रज्ञापारमितोपदेशशास्त्रे अष्टमाधिकारः ।